॥ नमः सर्वज्ञाय ॥

एवं मया श्रुतं। एकस्मिन्समये भगवान्राजगृहे विहरति स्म गृध्रकूटे पर्वते महता भिक्षुसंघेन सार्धं महता च बोधिसत्त्वसंघेन । तेन खलु समयेन भगवान्गंभीरावसंबोध नाम समाधिं समापन्नः। तेन च समयेनार्यावलोकितेश्वरो बोधिसत्त्वो महासत्त्वो गंभीरायां प्रज्ञापारमितायां चर्यां चरमाण एवं व्यवलोकयति स्म। पंच स्कंधास्तांश्च स्वभावशून्यं व्यवलोकयति। अथायुष्माञ्छारिपुत्रो बुद्धानुभावेनार्यावलोकितेश्वरं बोधिसत्त्वं महासत्त्वमेतदवोचत्। यः कश्चित्कुलपुत्रो गंभीरायां प्रज्ञापारमितायां चर्यां चर्तुकामः कथं शिक्षितव्यः। एवमुक्त आर्यावलोकितेश्वरो बोधिसत्त्वो महासत्त्व आयुष्मंतं शारिपुत्रमेतदवोचत्। यः कश्चिच्छारिपुत्र कुलपुत्रो वा कुलदुहिता वा गंभीरायां प्रज्ञापारमितायां चर्यां चर्तुकामस्तेनैवं व्यवलोकयितव्यं । पंच स्कंधास्तांश्च स्वभावशून्यान्समनुपश्यति स्म। रूपं शून्यता शून्यतैव रूपं। रूपान्न पृथक् शून्यता शून्यताया न पृथग्रूपं। यद्रूपं सा शून्यता या शून्यता तद्रूपं। एवं वेदनासंज्ञासंस्कारविज्ञानानि च शून्यता। एवं शारिपुत्र सर्वधर्मा शून्यताकक्षणा अनुत्पन्ना अनिरुद्धा अमला विमला अनूना असंपूर्णाः। तस्मात्तर्हि शारिपुत्र शून्यतायां न रूपं न वेदना न संज्ञा न

संस्कारा न विज्ञानं। न चक्षुर्न श्रोत्रं न घ्राणं न जिव्हा न कायो न मनो न रूपं न शब्दो न गंधो न रसो न स्प्रष्टव्यं न धर्माः। न चक्षुर्धातुर्यावन्न मनोधातुर्न धर्मधातुर्न मनोविज्ञानधातुः॥ न विद्या नाविद्या न क्षयो यावन्न जरामरणं न जरामरणक्षयः। न दुःखसमुदयनिरोधमार्गा । न ज्ञानं न प्राप्तिर्नाप्राप्तिः।

तस्माच्छारिपुत्र अप्राप्तित्वेन बोधिसत्त्वानां प्रज्ञापारमितामश्रित्य विहरति चित्तावरणः। चित्तावरणनास्तित्वादत्रस्तो विपर्यासातिक्तांतो निष्ठनिर्वाणः।

त्र्यध्वव्यस्थिता सर्वबुद्धाः प्रज्ञापारमितामाश्रित्यानुत्तरां सम्यक्संबोधिमभिसंबुद्धाः। तस्माज्ज्ञातव्यः प्रज्ञापारमितामहामंत्रो महाविद्यामंत्रो ऽनुत्तरमंत्रो ऽसमसममंत्रः सर्वदुःखप्रशमनमंत्रः सत्यममिथ्यत्वात् प्रज्ञापारमितायामुक्तो मंत्रः। तद्यथा। गते गते पारगते पारसंगते बोधि स्वाहा॥ एवं शारिपुत्र गंभीरायां प्रज्ञापारमितायां चर्यायां शिक्षितव्यं बोधिसत्त्वेन। अथ खलु भगवान्

तस्मात्समाधेर्व्युत्थायार्यावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य साधुकारमदात्। साधु साधु कुलपुत्र एवमेतत्कुलपुत्र। एवमेतद्गंभीरायां प्रज्ञापारमितायां चर्यं चर्तव्यं यथा त्वया निर्दिष्टमनुमोद्यये

सर्वतथागतैरर्हद्भिः सम्यक्संबुद्धैः। इदमवोचद्भगवानानंदमना आयुष्मा
ञ्छारिपुत्र आर्यावलोकितेश्वरश्च बोधिसत्त्वो महासत्त्वः सा च सर्वावती
पर्षत्सदेवमानुषासुरगंधर्वश्च लोको भगवतो भाषितमभ्यनंदन्निति॥
प्रज्ञापारमिताहृदयसूत्रं समाप्तं॥